॥ નવગ્રહ ધ્યાન મન્ત્રાઃ સાધુસઙ્કુલિ તન્ત્રાન્તર્ગતમ્ ॥

ગ્રહપુરશ્ચરણ પ્રયોગઃ

ઉૐ રક્તપદ્માસનં દેવં ચતુર્બાહુસમન્વિતમ્ ।
ક્ષત્રિયં રક્તવર્ણઞ્ચ ગોત્રં કાશ્યપસમ્ભવમ્ ॥

સપ્તાશ્વરથમારૂઢં પ્રચણ્ડં સર્વસિદ્ધિદમ્ ।
દ્વિભુજં રક્તપદ્મૈશ્ચ સંયુક્તં પરમાદ્ભુતમ્ ॥

કલિઙ્ગદેશજં દેવં મૌલિમાણિક્યભૂષણમ્ ।
ત્રિનેત્રં તેજસા પૂર્ણમુદયાચલસંસ્થિતમ્ ॥

દ્વાદશાઙ્ગુલ-વિસ્તીર્ણં પ્રવરં ઘૃતકૌશિકમ્ ।
શિવાધિદૈવં પુર્વાસ્યં બ્રહ્મપ્રત્યધિદૈવતમ્ ॥

ક્લીં ઐં શ્રીં હ્રીં સૂર્યાય નમઃ ।

ઉૐ શુક્લં શુક્લામ્બરધરં શ્વેતાબ્જસ્થં ચતુર્ભુજમ્ ।
હારકેયૂરનૂપુરૈર્મણ્ડિતં તમસાપહમ્ ॥

સુખદશ્યં સુધાયુક્ત-માત્રેયં વૈશ્યજાતિજમ્ ।
કલઙ્કાઙ્કિતસર્વાઙ્ગં કેશપાશાતિસુન્દરમ્ ॥

મુકુટૈર્મણિમાણિક્યૈઃ શોભનીયં તુ લોચનમ્ ।
યોષિત્પ્રિયં મહાનન્દં યમુનાજલસમ્ભવમ્ ॥

ઉમાધિદૈવતં દેવમાપપ્રત્યધિદૈવતમ્ ॥

હ્રીં હ્રીં હું સોમાય સ્વાહા ।

ઉૐ મેશાધિરૂઢં દ્વિભુજં શક્તિચાપધરં મુદા ।
રક્તવર્ણં મહાતેજં તેજસ્વીનાં સમાકુલમ્ ॥

રક્તવસ્ત્રપરિધાનમ્ નાનાલઙ્કારસંયુતમ્ ।
રક્તાઙ્ગં ધરણીપુત્રં રક્તમાલ્યાનુલેપનમ્ ॥

હસ્તે વારાહદશનં પૃષ્ઠે તૂણસમન્વિતમ્ ।
કટાક્ષાદ્ ભીતિજનકં મહામોહપ્રદં મહત્ ॥

મહાચાપધરં દેવં મહોગ્રમુગ્રવિગ્રહમ્ ।
સ્કન્દાદિદૈવં સૂર્યાસ્યં ક્ષિતિપ્રત્યધિદૈવતમ્ ॥

હ્રીં ઉૐ ઐં કુજાય સ્વાહા ।

ૐ સુતપ્તસ્વર્ણાભતનું રોમરાજિવિરાજિતમ્ ।
દ્વિભુજં સ્વર્ણદણ્ડેવ શરચ્ચન્દ્રનિભાનનમ્ ॥

ચરણે રત્નમઞ્જીરં કુમારં શુભલક્ષણમ્ ।
સ્વર્ણયજ્ઞોપવીતઞ્ચ પીતવસ્ત્રયુગાવૃતમ્ ॥

અત્રિગોત્રસમુત્પન્નં વૈશ્યજાતિં મહાબલમ્ ।
માગધં મહિમાપૂર્ણં દ્વિનેત્રં દ્વિભુજં શુભમ્ ॥

નારાયણાધિદૈવઞ્ચ વિષ્ણુપ્રત્યધિદૈવતમ્ ।
ચિન્તયેત્ સોમતનયં સર્વાભિષ્ટફલપ્રદં ॥

ૐ ક્લીં ૐ બુધાય સ્વાહા ।

ૐ કનકરુચિરગૌરં ચારુમૂર્તિં પ્રસન્નં
દ્વિભુજમપિ સરજૌ સંદધાનં સુરેજ્યં ।
વસનયુગદધાનં પીતવસ્ત્રં સુભદ્રં
સુરવરનરપુજ્યમઙ્ગિરોગોત્રયુક્તમ્ ॥

દ્વિજવરકુલજાતં સિન્ધુદેશપ્રસિદ્ધં
ત્રિજગતિ ગણશ્રેષ્ઠશ્ચાધિદૈવં તદીયમ્ ।
સકલગિરિનિહન્તા ઇન્દ્રઃ પ્રત્યાધિદૈવં
ગ્રહગણગુરુનાથં તં ભજેઽભીષ્ટસિદ્ધૌ ॥

રં યં હ્રીં ઐં ગુરવે નમઃ ।

ૐ શુક્લામ્બરં શુક્લરુચિં સુદીપ્તં
તુષારકુન્દેન્દુદ્યુતિં ચતુર્ભુજમ્ ।
ઇન્દ્રાધિદૈવં શચીપ્રત્યાધિદૈવં
વેદાર્થવિજ્ઞં ચ કવિં કવીનામ્ ॥

ભૃગુગોત્રયુક્તં દ્વિજજાતિમાત્રં
દિતીન્દ્રપૂજ્યં ખલુ શુદ્ધિશાન્તં ।
સર્વાર્થસિદ્ધિપ્રદમેવ કાવ્યં
ભજેઽપ્યહં ભોજકતોદ્ભવં ભૃગુમ્ ॥

હું હું શ્રીં શ્રીં નં રં શુક્રાય સ્વાહા ।

ૐ સૌરિં ગૃધ્રગતાતિકૃષ્ણવપુષં કાલાગ્નિવત્ સઙ્કુલં
સંયુક્તં ભુજપલ્લવૈરુપલસત્સ્તમ્ભૈશ્ચતુર્ભિઃ સમૈઃ ।
ભીમં ચોગ્રમહાબલાતિવપુષં બાધાગણૈઃ સંયુતં
ગોત્રં કાશ્યપજં સુરાષ્ટ્રવિભવં કાલાગ્નિદૈવં શનિમ્ ॥

વસ્ત્રૈઃ કૃષ્ણમયૈર્યુતં તનુવરં તં સૂર્યસૂનું ભજે ॥

હ્રીં ક્લીમ્ શનૈશ્ચરાય નમઃ ।

ૐ મહિષસ્થં કૃષ્ણં વદનમયવિભું કર્ણનાસાક્ષિમાત્રમ્
કારાલાસ્યં ભીમં ગદવિભવયુતં શ્યામવર્ણં મહોગ્રં ।
પૈઠીનં ગોત્રયુક્તં રવિશશીદમનં ચાધિદૈવં યમોઽપિ
સર્પપ્રત્યધિદૈવતં મલયગીર્ભાવં તં તમસં નમામિ ॥

વં ઐં વં વં ક્લીં વં તમસે સ્વાહા ।

ૐ મહોગ્રં ધૂમાભં કરચરણયુતં છિન્નશીર્ષં સુદીપ્તમ્
હસ્તે વાણં કૃપાણં ત્રિશિખશશિધૃતં વેદહસ્તં પ્રસન્નં ।
બ્રહ્મા તસ્યાધિદૈવં સકલગદયુતં સર્પપ્રત્યધિદૈવં ધ્યાયેત્
કેતું વિશાલં સકલસુરનરે શાન્તિદં પુષ્ટિદઞ્ચ ॥

શ્રીં શ્રીં આં વં રં લં કેતવે સ્વાહા ।